श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ त्रिचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रिचत्वारिंशः सर्गः ॥

## द्वन्द्वयुद्धे वानरै रक्षसां पराजयः

युध्यतां तु ततस्तेषां वानराणां महात्मनाम्।
रक्षसां सम्बभूवाथ बलरोषः सुदारुणः॥ **6.43.1** ॥

ते हयैः काञ्चनापीडैर्गजैश्चाग्निशिखोपमैः।
रथैश्चादित्यसङ्काशैः कवचैश्च मनोरमैः॥ **6.43.2** ॥

निर्ययू राक्षसा वीरा नादयन्तो दिशो दश।
राक्षसा भीमकर्माणो रावणस्य जयैषिणः॥ **6.43.3** ॥

वानराणामपि चमूर्बृहती जयमिच्छताम्।
अभ्यधावत तां सेनां रक्षसां घोरकर्मणाम्॥ **6.43.4** ॥

एतस्मिन्नन्तरे तेषामन्योन्यमभिधावताम्।
रक्षसां वानराणां च द्वन्द्वयुद्धमवर्तत॥ **6.43.5** ॥

अङ्गदेनेन्द्रजित्सार्धं वालिपुत्रेण राक्षसः।
अयुध्यत महातेजास्त्र्यम्बकेण यथान्धकः॥ **6.43.6** ॥

प्रजङ्घेन च सम्पातिर्नित्यं दुर्धर्षणो रणे।
जम्बुमालिनमारब्धो हनूमानपि वानरः॥ **6.43.7** ॥

सङ्गतस्तु महाक्रोधो राक्षसो रावणानुजः।
समरे तीक्ष्णवेगेन शत्रुघ्नेन विभीषणः॥ **6.43.8** ॥

तपनेन गजः सार्धं राक्षसेन महाबलः।
निकुम्भेन महातेजा नीलोऽपि समयुध्यत॥ **6.43.9** ॥

वानरेन्द्रस्तु सुग्रीवः प्रघसेन सुसङ्गतः।
सङ्गतः समरे श्रीमान् विरूपाक्षेण लक्ष्मणः॥ **6.43.10** ॥

अग्निकेतुः सुदुर्धर्षो रश्मिकेतुश्च राक्षसः।
सुप्तघ्नो यज्ञकोपश्च रामेण सह सङ्गताः॥ **6.43.11** ॥

वज्रमुष्टिश्च मैन्देन द्विविदेनाशनिप्रभः।
राक्षसाभ्यां सुघोराभ्यां कपिमुख्यौ समागतौ॥ **6.43.12** ॥

वीरः प्रतपनो घोरो राक्षसो रणदुर्धरः।
समरे तीक्ष्णवेगेन नलेन समयुध्यत॥ **6.43.13** ॥

धर्मस्य पुत्रो बलवान् सुषेण इति विश्रुतः।
स विद्युन्मालिना सार्धमयुध्यत महाकपिः॥ **6.43.14** ॥

वानराश्चापरे घोरा राक्षसैरपरैः सह।
द्वन्द्वं समीयुः सहसा युद्ध्वा च बहुभिः सह॥ **6.43.15** ॥

तत्रासीत् सुमहद् युद्धं तुमुलं रोमहर्षणम्।
रक्षसां वानराणां च वीराणां जयमिच्छताम्॥ **6.43.16** ॥

हरिराक्षसदेहेभ्यः प्रभूताः केशशाद्वलाः।
शरीरसङ्घाटवहाः प्रसुस्रुः शोणितापगाः॥ **6.43.17** ॥

आजघानेन्द्रजित् क्रुद्धो वज्रेणेव शतक्रतुः।
अङ्गदं गदया वीरं शत्रुसैन्यविदारणम्॥ **6.43.18** ॥

तस्य काञ्चनचित्राङ्गं रथं साश्वं ससारथिम्।
जघान गदया श्रीमानङ्गदो वेगवान् हरिः॥ **6.43.19** ॥

सम्पातिस्तु प्रजङ्घेन त्रिभिर्बाणैः समाहतः।
निजघानाश्वकर्णेन प्रजङ्घं रणमूर्धनि॥ **6.43.20** ॥

जम्बुमाली रथस्थस्तु रथशक्त्या महाबलः।
बिभेद समरे क्रुद्धो हनूमन्तं स्तनान्तरे॥ **6.43.21** ॥

तस्य तं रथमास्थाय हनूमान् मारुतात्मजः।
प्रममाथ तलेनाशु सह तेनैव रक्षसा॥ **6.43.22** ॥

नदन् प्रतपनो घोरो नलं सोऽभ्यनुधावत।
नलः प्रतपनस्याशु पातयामास चक्षुषी॥ **6.43.23** ॥

भिन्नगात्रः शरैस्तीक्ष्णैः क्षिप्रहस्तेन रक्षसा।
ग्रसन्तमिव सैन्यानि प्रघसं वानराधिपः॥ **6.43.24** ॥

सुग्रीवः सप्तपर्णेन निजघान जवेन च।
प्रपीड्य शरवर्षेण राक्षसं भीमदर्शनम्॥ **6.43.25** ॥

निजघान विरूपाक्षं शरेणैकेन लक्ष्मणः।
अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः।
सुप्तघ्नो यज्ञकोपश्च रामं निर्बिभिदुः शरैः॥ **6.43.26** ॥

तेषां चतुर्णां रामस्तु शिरांसि समरे शरैः।
क्रुद्धश्चतुर्भिश्चिच्छेद घोरैरग्निशिखोपमैः॥ **6.43.27** ॥

वज्रमुष्टिस्तु मैन्देन मुष्टिना निहतो रणे।
पपात सरथः साश्वः पुराट्ट इव भूतले॥ **6.43.28** ॥

निकुम्भस्तु रणे नीलं नीलाञ्जनचयप्रभम्।
निर्बिभेद शरैस्तीक्ष्णैः करैर्मेघमिवांशुमान्॥ **6.43.29**॥

पुनः शरशतेनाथ क्षिप्रहस्तो निशाचरः।
बिभेद समरे नीलं निकुम्भः प्रजहास च॥ **6.43.30**॥

तस्यैव रथचक्रेण नीलो विष्णुरिवाहवे।
शिरश्चिच्छेद समरे निकुम्भस्य च सारथेः॥ **6.43.31**॥

वज्राशनिसमस्पर्शो द्विविदोऽप्यशनिप्रभम्।
जघान गिरिशृङ्गेण मिषतां सर्वरक्षसाम्॥ **6.43.32**॥

द्विविदं वानरेन्द्रं तु द्रुमयोधिनमाहवे।
शरैरशनिसङ्काशैः स विव्याधाशनिप्रभः॥ **6.43.33**॥

स शरैरभिविद्धाङ्गो द्विविदः क्रोधमूर्च्छितः।
सालेन सरथं साश्वं निजघानाशनिप्रभम्॥ **6.43.34**॥

विद्युन्माली रथस्थस्तु शरैः काञ्चनभूषणैः।
सुषेणं ताडयामास ननाद च मुहुर्मुहुः॥ **6.43.35**॥

तं रथस्थमथो दृष्ट्वा सुषेणो वानरोत्तमः।
गिरिशृङ्गेण महता रथमाशु न्यपातयत्॥ **6.43.36**॥

लाघवेन तु संयुक्तो विद्युन्माली निशाचरः।
अपक्रम्य रथात् तूर्णं गदापाणिः क्षितौ स्थितः॥ **6.43.37**॥

ततः क्रोधसमाविष्टः सुषेणो हरिपुङ्गवः।
शिलां सुमहतीं गृह्य निशाचरमभिद्रवत्॥ **6.43.38**॥

तमापतन्तं गदया विद्युन्माली निशाचरः।
वक्षस्यभिजघानाशु सुषेणं हरिपुङ्गवम्॥ **6.43.39**॥

गदाप्रहारं तं घोरमचिन्त्य प्लवगोत्तमः।
तां तूष्णीं पातयामास तस्योरसि महामृधे ॥ **6.43.40** ॥

शिलाप्रहाराभिहतो विद्युन्माली निशाचरः।
निष्पिष्टहृदयो भूमौ गतासुर्निपपात ह ॥ **6.43.41** ॥

एवं तैर्वानरैः शूरैः शूरास्ते रजनीचराः।
द्वन्द्वे विमथितास्तत्र दैत्या इव दिवौकसैः ॥ **6.43.42** ॥

भल्लैश्चान्यैर्गदाभिश्च शक्तितोमरसायकैः।
अपविद्धैश्चापि रथैस्तथा साङ्ग्रामिकैर्हयैः ॥ **6.43.43** ॥

निहतैः कुञ्जरैर्मत्तैस्तथा वानरराक्षसैः।
चक्राक्षयुगदण्डैश्च भग्नैर्धरणिसंश्रितैः ॥ **6.43.44** ॥

बभूवायोधनं घोरं गोमायुगणसेवितम्।
कबन्धानि समुत्पेतुर्दिक्षु वानररक्षसाम्।
विमर्दे तुमुले तस्मिन् देवासुररणोपमे ॥ **6.43.45** ॥

निहन्यमाना हरिपुङ्गवैस्तदा
    निशाचराः शोणितगन्धमूर्च्छिताः।
पुनः सुयुद्धं तरसा समाश्रिता
    दिवाकरस्यास्तमयाभिकाङ्क्षिणः ॥ **6.43.46** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रिचत्वारिंशः सर्गः ॥